# শ্রীরাধাকবচম্

{॥ শ্রীরাধাকবচম্ ॥}

শ্রীগণেশায নমঃ ।

পার্বত্যুবাচ

কৈলাসিঅবাসিন্ ভগবন্ ভক্তানুগ্রহকারক ।

রাধিকাকবচং পুণ্যং কথযস্ব মম প্রভো ॥ ১॥

যদ্যস্তি করুণা নাথ ত্রাহি মাং দুঃখতো ভযাত্ ।

ত্বমেব শরণং নাথ শূলপাণে পিনাকধৃক্ ॥ ২॥

শিব উবাচ

শৃণুষ্ব গিরিজে তুভ্যং কবচং পূর্বসূচিতম্ ।

সর্বরক্ষাকরং পুণ্যং সর্বহত্যাহরং পরম্ ॥ ৩॥

হরিভক্তিপ্রদং সাক্ষাদ্ভুক্তিমুক্তিপ্রসাধনম্ ।

ত্রৈলোক্যাকর্ষণং দেবি হরিসান্নিধ্যকারকম্ ॥ ৪॥

সর্বত্র জযদং দেবি সর্বশত্রুভযাবহম্ ।

সর্বেষাং চৈব ভূতানাং মনোবৃত্তিহরং পরম্ ॥ ৫॥

চতুর্ধা মুক্তিজনকং সদানন্দকরং পরম্ ।

রাজসূযাশ্বমেধানাং যজ্ঞানাং ফলদাযকম্ ॥ ৬॥

ইদং কবচমজ্ঞাত্বা রাধামন্ত্রং চ যো জপেত্ ।
স নাপ্নোতি ফলং তস্য বিঘ্নাস্তস্য পদে পদে ॥ ৭॥

ঋষিরস্য মহাদেবোঽনুষ্টুপ্ ছন্দশ্চ কীর্তিতম্ ।
রাধাঽস্য দেবতা প্রোক্তা রাং বীজং কীলকং স্মৃতম্ ॥ ৮॥

ধর্মার্থকামমোক্ষেষু বিনিযোগঃ প্রকীর্তিতঃ ।
শ্রীরাধা মে শিরঃ পাতু ললাটং রাধিকা তথা ॥ ৯॥

শ্রীমতী নেত্রযুগলং কর্ণৌ গোপেন্দ্রনন্দিনী ।
হরিপ্রিযা নাসিকাং চ ভ্রূযুগং শশিশোভনা ॥ ১০॥

ওষ্ঠং পাতু কৃপাদেবী অধরং গোপিকা তথা ।
বৃষভানুসুতা দন্তাংশ্চিবুকং গোপনন্দিনী ॥ ১১॥

চন্দ্রাবলী পাতু গণ্ডং জিহ্বাং কৃষ্ণপ্রিযা তথা ।
কণ্ঠং পাতু হরিপ্রাণা হৃদযং বিজযা তথা ॥ ১২॥

বাহূ দ্বৌ চন্দ্রবদনা উদরং সুবলস্বসা ।
কোটিযোগান্বিতা পাতু পাদৌ সৌভদ্রিকা তথা ॥ ১৩॥

নখাংশ্চন্দ্রমুখী পাতু গুল্ফৌ গোপালবল্লভা ।

নখান্ বিধুমুখী দেবী গোপী পাদতলং তথা ॥ ১৪॥

শুভপ্রদা পাতু পৃষ্ঠং কুক্ষৌ শ্রীকান্তবল্লভা ।

জানুদেশং জয়া পাতু হরিণী পাতু সর্বতঃ ॥ ১৫॥

বাক্যং বাণী সদা পাতু ধনাগারং ধনেশ্বরী ।

পূর্বাং দিশং কৃষ্ণরতা কৃষ্ণপ্রাণা চ পশ্চিমাম্ ॥ ১৬॥

উত্তরাং হরিতা পাতু দক্ষিণাং বৃষভানুজা ।

চন্দ্রাবলী নৈশমেব দিবা ক্ষ্বেডিতমেখলা ॥ ১৭॥

সৌভাগ্যদা মধ্যদিনে সাযাহ্নে কামরূপিণী ।

রৌদ্রী প্রাতঃ পাতু মাং হি গোপিনী রজনীক্ষযে ॥ ১৮॥

হেতুদা সঙ্গবে পাতু কেতুমালা দিবার্ধকে ।

শেষাঽপরাহ্নসমবে শমিতা সর্বসন্ধিষু ॥ ১৯॥

যোগিনী ভোগসময়ে রতৌ রতিপ্রদা সদা ।

কামেশী কৌতুকে নিত্যং যোগে রত্নাবলী মম ॥ ২০॥

সর্বদা সর্বকার্যেষু রাধিকা কৃষ্ণমানসা ।

***Stotram Digitalized By [Sanskritdocuments.org](http://Sanskritdocuments.org)***

ইত্যেতৎকথিতং দেবি কবচং পরমাদ্ভুতম্ ॥ ২১॥

সর্বরক্ষাকরং নাম মহারক্ষাকরং পরম্ ।

প্রাতর্মধ্যাহ্নসময়ে সায়াহ্নে প্রপঠেদ্যদি ॥ ২২॥

সর্বার্থসিদ্ধিস্তস্য স্যাদ্যন্মনসি বর্ততে ।

রাজদ্বারে সভায়াং চ সঙ্গ্রামে শত্রুসঙ্কটে ॥ ২৩॥

প্রাণার্থনাশসময়ে যঃ পঠেৎপ্রয়তো নরঃ ।

তস্য সিদ্ধির্ভবেদ্দেবি ন ভয়ং বিদ্যতে ক্বচিত্ ॥ ২৪॥

আরাধিতা রাধিকা চ তেন সত্যং ন সংশয়ঃ ।

গঙ্গাস্নানাদ্ধরের্নামগ্রহণাদ্যৎফলং লভেত্ ॥ ২৫॥

তৎফলং তস্য ভবতি যঃ পঠেৎপ্রয়তঃ শুচিঃ ।

হরিদ্রারোচনাচন্দ্রমণ্ডিতং হরিচন্দনম্ ॥ ২৬॥

কৃত্বা লিখিত্বা ভূর্জে চ ধারয়েন্মস্তকে ভুজে ।

কণ্ঠে বা দেবদেবেশি স হরির্নাত্র সংশয়ঃ ॥ ২৭॥

কবচস্য প্রসাদেন ব্রহ্মা সৃষ্টিং স্থিতিং হরিঃ ।

সংহারং চাহং নিয়তং করোমি কুরুতে তথা ॥ ২৮॥

বৈষ্ণবায বিশুদ্ধায বিরাগগুণশালিনে ।

দদ্যাৎকবচমব্যগ্রমন্যথা নাশমাপ্নুযাত্ ॥ ২৯॥

॥ ইতি শ্রীনারদপঞ্চরাত্রে জ্ঞানামৃতসারে রাধাকবচং

সম্পূর্ণম্ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Radha Kavacham Lyrics in Bengali PDF
% File name : raadhaakavach.itx
% Category : kavacha
% Location : doc_deities_misc
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : nAradapa.ncharAtra
% Latest update : July 04, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.

%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website